नभोनभस्यप्रसृतिभानवः कीर्त्तिवर्द्धनाः ॥
दत्तोलिश्च्यवनस्तम्बः प्राणः कश्यप एव च ।
और्व्वो बृहस्पतिश्चैव सप्त सप्तर्षयः स्मृताः ॥
देवाश्च तुषिता नाम स्मृताः स्वारोचिषेऽन्तरे ।
हस्तीन्द्रः सुकृतो मूर्त्तिरापज्योतिरयः स्मयः ॥
वशिष्ठस्य सुताः सप्त ये प्रजापतयस्तदा ।
द्वितीयमेतत् कथितं मन्वन्तरमतः परम् ॥”
इति मात्स्ये । ९ । ७—१० ॥

स्वार्थः, पुं, (स्वस्य अर्थः ।) स्वीयाभिधेयः । स्वकीयधनम् । स्वीयवस्तु । आत्मप्रयोजनम् । (यथा, माघे । २ । ६५ ।
“यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः ।
वयं हनाम द्विषतः सर्व्वः स्वार्थं समीहते ॥”)
स्वनिवृत्तिः । इति अर्थशब्दार्थदर्शनात् ॥ लिङ्गार्थविशेषः । यथा,—
“स्वार्थौ द्रव्यञ्च लिङ्गञ्च संख्या कर्म्मादिरेव च ।
अमी पञ्चैव लिङ्गार्थास्त्रयः केषाञ्चिदग्रिमाः ॥
स्वार्थो विशेषणम् । द्रव्यं विशेष्यम् । लिङ्गं पुंस्त्वादि । संख्या एकत्वादिः । कर्म्मादिर्ढादिः ।”
इति मुग्धबोधटीकायां दुर्गादासः ॥

स्वास्थ्य, क्ली, (स्वस्थस्य भावः । स्वस्थ + ष्यञ् ।) आरोग्यम् । इति शब्दरत्नावली ॥ (यथा,—
“गतवेगे भवेत् स्वास्थ्यं सर्व्वेष्वाक्षेपकादिषु ।”
इति माधवकरकृतरुग्विनिश्चयसंग्रहे वातव्याध्यधिकारे ॥) सन्तोषः । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । ३ । २४९ ।
“किं वच्म्यन्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ॥”)

स्वाहा, व्य, (सुष्ठु आहूयन्ते देवा अनेनेति । सु + आ + ह्वे + डा ।) देवहविर्द्दानमन्त्रः । तत्पर्य्यायः । श्रौषट् २ वौषट् ३ वषट् ४ स्वधा ५ । इत्यमरः । ३ । ४ । ८ ॥ अस्य टीका स्वधाशब्दे द्रष्टव्या ॥ (यथा, देवीमाहात्म्ये । १ । ५४ ।
“त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥”)

स्वाहा, स्त्री, अग्निभार्य्या । सा दक्षकन्या । इति श्रीभागवतम् ॥ तत्पर्य्यायः । अग्नायी २ हुतभुक्प्रिया ३ । इत्यमरः । २ । ३ । २१ ॥ द्विठः ४ अनलप्रिया ५ । इति बीजवर्णाभिधानम् ॥ वह्निवधूः । ६ । इति शब्दरत्नावली ॥*॥ मतान्तरे तस्या उत्पत्तिर्यथा,—
नारद उवाच ।
“स्वाहा देवहविर्द्दाने प्रशस्ता सर्व्वकर्म्मसु ।
पितृदाने स्वधा शस्ता दक्षिणा सर्व्वतो वरा ॥
एतासां चरितं जन्म फलं प्राधान्यमेव च ।
श्रोतुमिच्छामि त्वद्वक्त्रात् वद वेदविदां वर ॥
सौतिरुवाच ।
नारदस्य वचः श्रुत्वा प्रहस्य मुनिपुङ्गवः ।
कथां कथितुमारेभे पुराणोक्तां पुरातनीम् ॥
श्रीनारायण उवाच ।
सृष्टेः प्रथमतो देवाश्चाहारार्थं ययुः पुरा ।
ब्रह्मलोके ब्रह्मसभामगम्यां सुमनोहराम् ॥
गत्वा निवेदनञ्चक्रुराहारहेतुकं मुने ।
ब्रह्मा श्रुत्वा प्रतिज्ञाय सिषेवे श्रीहरिं परम् ॥
यज्ञरूपो हि भगवान् कलया च बभूव सः ।
यज्ञे यद्यद्धविर्द्दानं दत्तं तेभ्यश्च कर्म्मणा ॥
हविर्द्ददति विप्राश्च भक्त्या च क्षत्त्रियादयः ।
सुरा नैव प्राप्नुवन्ति तद्दानं मुनिपुङ्गव ! ॥
देवा विषण्णास्ते सर्व्वे तत्सभाञ्च ययुः पुनः ।
गत्वा निवेदनं चक्रुराहाराभावहेतुकम् ॥
ब्रह्मा श्रुत्वा तु ध्यानेन श्रीकृष्णशरणं ययौ ।
पूजाञ्चकार प्रकृतेर्ध्यानेनैव तदाज्ञया ॥
प्रकृतेः कलया चैव सर्व्वशक्तिस्वरूपिणी ।
बभूव दाहिका शक्तिरग्नेः स्वाहा स्वकामिनी ॥
ईषद्धास्यप्रसन्नास्या भक्तानुग्रहकातरा ॥
उवाचेति विधेरग्रे पद्मयोने ! वरं वृणु ।
विधिस्तद्वचनं श्रुत्वा संभ्रमात् समुवाच ताम् ॥
ब्रह्मोवाच ।
त्वमग्नेर्दाहिका शक्तिर्भव पत्नी च सुन्दरि ! ।
दग्धुं न शक्तस्त्वकृतो हुताशश्च त्वया विना ॥
त्वन्नामोच्चार्य्य मन्त्रान्ते यो दास्यति हविर्नरः ।
सुरेभ्यस्तत् प्राप्नुवन्ति सुराः स्वानन्दपूर्व्वकम् ॥
अग्नेः सम्पत्स्वरूपा च श्रीरूपा सा गृहेश्वरी ।
देवानां पूजिता शश्वत् नरादीनां भवाम्बिके ॥
ब्रह्मणश्च वचः श्रुत्वा सा विषण्णा बभूव ह ।
तमुवाच ततो देवी स्वाभिप्रायं स्वयम्भुवम् ॥
स्वाहोवाच ।
अहं कृष्णं भजिष्यामि तपसा सुचिरेण च ॥
ब्रह्मंस्तदन्यत् यत्किञ्चित् स्वप्नवद्भ्रम एव च ॥
विधाता जगतां त्वञ्च शम्भुर्मृत्युञ्जयः प्रभो ।
विभर्त्ति शेषो विश्वञ्च धर्म्मः साक्षी च धर्म्मिणाम् ॥
सर्व्वाद्यपूज्यो देवानां गणेषु च गणेश्वरः ।
प्रकृतिः सर्व्वसूः सर्व्वपूजिता यत्प्रसादतः ॥
ऋषयो मुनयश्चैव पूजिता यं निषेव्य च ।
तत्पादपद्मं पद्मैकभावेन चिन्तयाम्यहम् ॥
पद्मास्या पार्श्वमित्युक्त्वा पद्मनाभानुसारतः ।
जगाम तपसे पार्श्वे पद्मादीशस्य पद्मजा ॥
तपस्तेपे लक्षवर्षमेकपादेन पद्मजा ।
तदा ददर्श श्रीकृष्णं निर्गुणं प्रकृतेः परम् ॥
अतीवकमनीयञ्च रूपं दृष्ट्वा च रूपिणी ।
मूर्च्छां संप्राप कामेन कामेशस्य च कामुकी ॥
विज्ञाय तदभिप्रायं सर्व्वेशस्तामुवाच सः ।
समुत्थाप्य च स्वक्रोड़े क्षीणाङ्गीं तपसा चिरम् ॥
श्रीकृष्ण उवाच ।
वाराहे च त्वमंशेन मम पत्नी भविष्यसि ।
नाम्ना नाग्नजिती कन्या कान्ते नग्नजितस्य च ॥
अधुनाग्नेर्दाहिका त्वं भव पत्नी च भाविनि ! ।
मन्त्ररूपा च पूता च मत्प्रसादाद्भविष्यसि ॥
वह्निस्त्वां भक्तिभावेन संपूज्य च गृहेश्वरीम् ।
रमिष्यते त्वया सार्द्धं रामया रमणीयया ॥
इत्युक्त्वान्तर्दधे देवी देवीमाश्वास्य नारद ! ।
तत्राजगाम संत्रस्तो वह्निर्ब्रह्मनिदेशतः ॥
सामवेदोक्तध्यानेन ध्यात्वा तां जगदम्बिकाम् ।
संपूज्य परितुष्टाव पाणिं जग्राह मन्त्रतः ॥
तदा दिव्यवर्षशतं स रेमे रामया सह ।
अतीवनिर्ज्जने रम्ये संभोगसुखदे सदा ॥
बभूव गर्भस्तस्याश्च हुताशस्य च तेजसा ।
तद्दधार च सा देवी दिव्यं द्वादशवत्सरम् ॥
ततः सुषाव पुत्त्रांश्च रमणीयान्मनोहरान् ।
दक्षिणाग्निर्गार्हपत्याहवनीयान् क्रमेण च ॥
ऋषयो मुनयश्चैव ब्राह्मणाः क्षत्त्रियादयः ।
स्वाहान्तं मन्त्रमुच्चार्य्य हविर्द्ददति नित्यशः ॥
स्वाहायुक्तञ्च मन्त्रञ्च यो गृह्णाति प्रशस्तकम् ।
सर्व्वसिद्धिर्भवेत्तस्य ब्रह्मन् ग्रहणमात्रतः ॥
विषहीनो यथा सर्पो वेदहीनो यथा द्विजः ।
पतिसेवाविहीना स्त्री विद्याहीनो यथा नरः ॥
फलशाखाविहीनश्च यथा वृक्षो हि निन्दितः ।
स्वाहाहीनस्तथा मन्त्रो न हुतं फलदायकः ॥
परितुष्टाः द्विजाः सर्व्वे देवाः संप्रापुराहुतिम् ।
स्वाहान्तेनैव मन्त्रेण सफलं सर्व्वकर्म्म च ॥
इत्येवं कथितं सर्व्वं स्वाहोपाख्यानमुत्तमम् ।
सुखदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥
नारद उवाच ।
स्वाहापूजाविधानञ्च ध्यानं स्तोत्रं मुनीश्वर ।
संपूज्य वह्निस्तुष्टाव येन तां वद मे प्रभो ! ॥
श्रीनारायण उवाच ।
ध्यानञ्च सामवेदोक्तं स्तोत्रं पूजाविधानकम् ।
वदामि श्रूयतां ब्रह्मन् सावधानं निशामय ॥
सर्व्वयज्ञारम्भकाले शालग्रामे घटेऽथवा ।
स्वाहां संपूज्य यत्नेन यज्ञं कुर्य्यात् फलाप्तये ॥
स्वाहां मन्त्राङ्गभूताञ्च मन्त्रसिद्धस्वरूपिणीम् ।
सिद्धाञ्च सिद्धिदां नृणां कर्म्मणां फलदां भजे ॥
इति ध्यात्वा च मूलेन दत्त्वा पाद्यादिकं नरः ।
सर्व्वसिद्धिं लभेत् स्तुत्वा मूलं स्तोत्रं मुने शृणु ॥
ॐ ह्रीं श्रीं वह्निजायायै देव्यै स्वाहेत्यनेन च ।
यः पूजयेच्च तां देवीं सर्व्वेष्टं लभते ध्रुवम् ॥
वह्निरुवाच ।
स्वाहाद्याः प्रकृतेरंशा मन्त्रान्ताङ्गस्वरूपिणी ।
मन्त्राणां फलदात्री च धात्री च जगतां सती ॥
सिद्धिरूपा च सिद्धा च सिद्धिदा सर्व्वदा नृणाम् ।
हुताशदाहिका शक्तिस्तत्प्राणाधिकरूपिणी ॥
संसारसाररूपा च घोरसंसारतारिणी ।
देवजीवनरूपा च देवपोषणकारिणी ॥
षोड़शैतानि नामानि यः पठेद्भक्तिसंयुतः ।
सर्व्वसिद्धिर्भवेत्तस्य सर्व्वकर्म्म सुशोभनम् ।
अपुत्त्रो लभते पुत्त्रमभार्य्यो लभते प्रियाम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे स्वाहोपाख्यानं नाम । ४० । ७—५६ ॥*॥ बौद्धशक्तिविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ श्रीः ५ मनोरमा ६ तारिणी ७ जया ८